शवारूढायै नमः
शत्रुसंहारकारिण्यै नमः।
शत्रुपक्षक्षतिप्रीतायै
शत्रुपक्षनिषूदिन्यै नमः
शत्रुग्रीवाच्छिदाच्छायायै
शत्रुपद्धतिखण्डिन्यै नमः१०००





शत्रुप्राणहराहार्यायै नमः
शत्रून्मूलनकारिण्यै नमः
शत्रुकार्यविहन्त्र्यै नमः
साङ्गशत्रुविनाशिन्यै नमः।
साङ्गशत्रुकुलच्छेत्र्यै नमः
शत्रुसद्मप्रदाहिन्यै नमः
साङ्गसायुधसर्वारि–
सर्वसम्पत्तिनाशिन्यै नमः।
साङ्गसायुधसर्वारि–
देहगेहप्रदाहिन्यै १००८
*********

॥ श्रीबगलामुखी–अष्टोत्तरशतनामस्तोत्रम् ॥

| | |
|---|---|
| ॐ बगलायै नमः | बुद्धभार्यायै नमः |
| विष्णुवनितायै नमः | बौद्धपाखण्डखण्डिन्यै |
| विष्णुशङ्करभामिन्यै | कल्किरूपायै नमः |
| बहुलायै नमः | कलिहरायै नमः |
| वेदमात्रे नमः | कलिदुर्गतिनाशिन्यै नमः |
| महाविष्णुप्रसुवे | कोटिसूर्यप्रतीकाशायै नमः |
| महामत्स्यमहाकूर्ममहा– | कोटिकन्दर्पमोहिन्यै नमः। |
| –वाराहरूपिण्यै नमः। | केवलायै नमः |
| नरसिंहप्रियायै नमः | कठिनायै नमः |
| रम्यायै नमः | काल्यै नमः ३० |
| वामनायै नमः१० | कलायै नमः |
| वटुरूपिण्यै नमः | कैवल्यदायिन्यै नमः |
| जामदग्न्यस्वरूपायै | केशवीकेशवाराध्यायै नमः |
| रामायै नमः | किशोर्यै नमः |
| रामप्रपूजितायै नमः । | केशवस्तुतायै नमः । |
| कृष्णायै नमः | रुद्ररूपायै नमः |
| कपर्दिन्यै नमः | रुद्रमूर्त्यै नमः |
| कृत्यायै नमः | रुद्राण्यै नमः |
| कलहायै नमः | रुद्रदेवतायै नमः |
| कलिकारिण्यै नमः | नक्षत्ररूपायै नमः४० |
| बुद्धिरूपायै नमः २० | |





| | |
|---|---|
| नक्षत्रायै नमः | नीलायै नमः |
| नक्षत्रेशप्रपूजितायै नमः | घनायै नमः |
| नक्षत्रेशप्रियायै नमः | शुभ्रायै नमः |
| नित्यायै नमः | श्वेतायै नमः |
| नक्षत्रपतिवन्दितायै नमः | सौभाग्यदायिन्यै नमः। |
| नागिन्यै नमः | सुन्दर्यै नमः |
| नागजनन्यै नमः | सौभगायै नमः |
| नागराजप्रवन्दितायै नमः | सौम्यायै नमः |
| नागेश्वर्यै नमः | स्वर्णाभायै नमः |
| नागकन्यायै नमः ५० | स्वर्गतिप्रदायै नमः ७० |
| नागर्यै नमः | रिपुत्रासकर्यै रेखायै नमः |
| नगात्मजायै नमः | शत्रुसंहारकारिण्यै नमः। |
| नगाधिराजतनयायै नमः | भामिन्यै नमः |
| नगराजप्रपूजितायै नमः | मायास्तम्भिन्यै नमः |
| नवीनायै नमः | मोहिन्यै नमः |
| नीरदायै नमः | शुभायै नमः |
| पीतायै नमः | रागद्वेषकर्यै नमः |
| श्यामायै नमः | रात्र्यै नमः |
| सौन्दर्यकारिण्यै नमः | रौरवध्वंसकारिण्यै नमः। |
| रक्तायै नमः ६० | यक्षिणीसिद्धनिवहायै ८० |

सिद्धेशायै नमः
सिद्धरूपिण्यै नमः
लङ्कापतिध्वंसकर्यै नमः
लङ्केशरिपुवन्दितायै
लङ्कानाथकुलहरायै
महारावणहारिण्यै नमः
देवदानवसिद्धौघ–
–पूजितायै नमः
परमेश्वर्यै नमः।
पराणुरूपायै नमः
परमायै नमः ९०
परतन्त्रविनाशिन्यै नमः
वरदायै नमः
वरदाराध्यायै नमः
वरदानपरायणायै नमः ।
वरदेशप्रियायै नमः
वीरायै नमः
वीरभूषणभूषितायै नमः
वसुदायै नमः
बहुदायै नमः
वाण्यै नमः १००

ब्रह्मरूपायै नमः
वराननायै नमः ।
बलदायै नमः
पीतवसनायै नमः
पीतभूषणभूषितायै नमः
पीतपुष्पप्रियायै नमः
पीतहारायै नमः
पीतस्वरूपिण्यै नमः१०८
**********





॥ श्रीबगलामुखी(पीताम्बरी) सहस्रनामस्तोत्रम् ॥

ॐ ब्रह्मास्त्राय नमः
ब्रह्मविद्यायै नमः
ब्रह्ममात्रे नमः
सनातन्यै नमः
ब्रह्मेश्यै नमः
ब्रह्मकैवल्यबगलायै
ब्रह्मचारिण्यै नमः।
नित्यानन्दायै नमः
नित्यसिद्धायै नमः
नित्यरूपायै नमः१०
निरामयायै नमः
सन्धारिण्यै नमः
महामायायै नमः
कटाक्षक्षेमकारिण्यै
कमलायै नमः
विमलायै नमः
नीलरत्नकान्ति–
–गुणाश्रितायै नमः
कामप्रियायै नमः
कामरतायै नमः
कामकामस्वरूपिण्यै २०

मङ्गलायै नमः
विजयायै नमः
जायायै नमः
सर्वमङ्गलकारिण्यै नमः
कामिन्यै नमः
कामिनीकाम्यायै नमः
कामुकायै नमः
कामचारिण्यै नमः।
कामप्रियायै नमः
कामरतायै नमः ३०
कामकामस्वरूपिण्यै नमः
कामाख्यायै नमः
कामबीजस्थायै नमः
कामपीठनिवासिन्यै नमः।
कामदायै नमः
कामहायै नमः
काल्यै नमः
कपाल्यै नमः
करालिकायै नमः
कंसार्यै नमः ४०

कमलायै नमः
कामायै नमः
कैलासेश्वरवल्लभायै
कात्यायन्यै नमः
केशवायै नमः
करुणायै नमः
कामकेलिभुजे नमः
क्रियाकीर्त्यै नमः
कृत्तिकायै नमः
काशिकायै नमः ५०
मथुरायै नमः
शिवायै नमः ।
कालाक्ष्यै नमः
कालिकायै नमः
कालीधवलाननसुन्दर्यै
खेचर्यै नमः
खमूर्त्यै नमः
क्षुद्राक्षुद्रक्षुधावरायै
खड्गहस्तायै नमः
खड्गरतायै नमः६०

खड्गिन्यै नमः
खर्परप्रियायै नमः
गङ्गायै नमः
गौर्यै नमः
गामिन्यै नमः
गीतायै नमः
गोत्रविवर्धिन्यै नमः।
गोधरायै नमः
गोकरायै नमः
गोधायै नमः७०
गन्धर्वपुरवासिन्यै नमः
गन्धर्वायै नमः
गन्धर्वकलागोपिन्यै नमः
गरुडासनायै नमः ।
गोविन्दभावायै नमः
गोविन्दायै नमः
गान्धार्यै नमः
गन्धमादिन्यै नमः
गौराङ्ग्यै नमः
गोपिकामूर्तये नमः ८०





गोपीगोष्ठनिवासिन्यै
गन्धायै नमः
गजेन्द्रगामान्यायै नमः
गदाधरप्रियाग्रहायै नमः
घोरघोरायै नमः
घोररूपायै नमः
घनश्रोण्यै नमः
घनप्रभायै नमः ।
दैत्येन्द्रप्रबलायै नमः
घण्टावादिन्यै नमः ९०
घोरनिस्वनायै नमः
डाकिन्यै नमः
उमायै नमः
उपेन्द्रायै नमः
उर्वश्यै नमः
उरगासनायै नमः ।
उत्तमायै नमः
उन्नतायै नमः
उन्नायै नमः
उत्तमस्थानवासिन्यै नमः१००

चामुण्डायै नमः
मुण्डितायै नमः
चण्ड्यै नमः
चण्डदर्पहरायै ।
उग्रचण्डायै नमः
चण्डचण्डायै नमः
चण्डदैत्यविनाशिन्यै नमः
चण्डरूपायै नमः
प्रचण्डायै नमः
चण्डाचण्डशरीरिण्यै ११०
चतुर्भुजायै नमः
प्रचण्डायै नमः
चराचरनिवासिन्यै नमः
छत्रप्रायशिरोवाहायै नमः
छलाच्छलतरायै नमः
छल्यै नमः।
क्षत्ररूपायै नमः
क्षत्रधरायै नमः
क्षत्रियक्षयकारिण्यै नमः
जयायै नमः१२०

जयदुर्गायै नमः
जयन्त्यै नमः
जयदायै नमः
परायै नमः ।
जायिनीजयिन्यै नमः
ज्योत्स्नाजटाधर–
–प्रियाऽजितायै नमः
जितेन्द्रियायै नमः
जितक्रोधायै नमः
जयमानायै नमः
जनेश्वर्यै नमः१३०
जितमृत्यवे नमः
जरातीतायै नमः
जाह्नव्यै नमः
जनकात्मजायै नमः
झङ्कारायै नमः
झञ्झरीझण्टायै नमः
झङ्कारीझकशोभिन्यै
झखाझमेशायै नमः
झङ्कारीयोनिकल्याण–
–दायिन्यै नमः
झञ्झरायै नमः १४०

झमुरीझारायै नमः
झराझरतरायै परायै नमः ।
झञ्झाझमेतायै नमः
झङ्कारीझणाकल्याण–
–दायिन्यै नमः
ञमुनामानसीचिन्त्यायै
ञमुनाशङ्करप्रियायै नमः ।
टङ्कारीटिटिकायै नमः
टीकाटङ्किन्यै नमः
टवर्गगायै नमः
टापाटोपायै नमः १५०
टटपतये नमः
टमन्यै नमः
टमनप्रियायै नमः ।
ठकारधारिण्यै नमः
ठीकाठङ्कर्यै नमः
ठिकरप्रियायै नमः
ठेकठासायै नमः
ठकरतीठामिन्यै नमः
ठमनप्रियायै नमः ।
डारहायै नमः १६०

Mahaperiaval Trust, Gurukrupa, Bangalore-54.



डाकिन्यै नमः
डाराडामरायै नमः
डमरप्रियायै नमः
डखिनीडडयुक्तायै नमः
डमरूकरवल्लभायै
ढक्काढक्कीढक्कनादायै
ढोलशब्दप्रबोधिन्यै
ढामिनीढामनप्रीतायै
ढगतन्त्रप्रकाशिन्यै
अनेकरूपिण्यै १७०
अम्बायै नमः
अणिमासिद्धिदायिन्यै
अमन्त्रिण्यै नमः
अणुकर्यै नमः
अणुमद्भानुसंस्थितायै
तारातन्त्रवत्यै नमः
तन्त्रतत्त्वरूपायै नमः
तपस्विन्यै नमः
तरङ्गिण्यै नमः
तत्त्वपरायै नमः१८०

तन्त्रिकातन्त्रविग्रहायै नमः
तपोरूपायै नमः
तत्त्वदात्र्यै नमः
तपःप्रीतिप्रधर्षिण्यै नमः
तन्त्रयन्त्रार्चनपरायै नमः
तलातलनिवासिन्यै नमः।
तल्पदायै नमः
अल्पदायै नमः
काम्यायै नमः
स्थिरायै नमः १९०
स्थिरतरायै स्थित्यै नमः
स्थाणुप्रियायै नमः
स्थाणुपरायै नमः
स्थितास्थानप्रदायिन्यै
दिगम्बरायै नमः
दयारूपायै नमः
दावाग्निदमनीदमायै नमः ।
दुर्गायै नमः
दुर्गपरादेव्यै नमः
दुष्टदैत्यविनाशिन्यै २००

Mahaperiaval Trust, Gurukrupa, Bangalore-54.

| | |
|---|---|
| दमनप्रमदायै नमः | धवलाधूलायै नमः |
| दैत्यदयादानपरायणायै | धनदायै नमः |
| दुर्गार्तिनाशिन्यै नमः | धनवर्धिन्यै नमः। |
| दान्तायै नमः | धीरायै नमः |
| दम्भिन्यै नमः | अधीरायै नमः |
| दम्भवर्जितायै नमः । | धीरतरायै नमः |
| दिगम्बरप्रियायै नमः | धीरसिद्धिप्रदायिन्यै नमः |
| दम्भायै नमः | धन्वन्तरिधराधीरायै नमः |
| दैत्यदम्भविदारिण्यै नमः | ध्येयध्यानस्वरूपिण्यै नमः। |
| दमनाशनसौन्दर्यायै २१० | नारायण्यै नमः२३० |
| दानवेन्द्रविनाशिन्यै | नारसिंह्यै नमः |
| दयाधरायै नमः | नित्यानन्दनरोत्तमायै नमः |
| दमन्यै नमः | नक्तानक्तावत्यै नमः |
| दर्भपत्रविलासिन्यै नमः | नित्यायै नमः |
| धरणीधारिण्यै नमः | नीलजीमूतसन्निभायै नमः |
| धात्र्यै नमः | नीलाङ्ग्यै नमः |
| धराधरधरप्रियायै नमः । | नीलवस्त्रायै नमः |
| धराधरसुतायै देव्यै | नीलपर्वतवासिन्यै नमः |
| सुधर्माधर्मचारिण्यै नमः | सुनीलपुष्पखचितायै नमः |
| धर्मज्ञायै नमः २२० | नीलजम्बूसमप्रभायै २४० |





| | |
|---|---|
| नित्याख्यायै षोडश्यै | पिङ्गमूर्धजायै नमः |
| विद्यायै नित्यायै नमः | पीतपुष्पार्चनरतायै नमः |
| नित्यसुखावहायै नमः | पीतपुष्पसमर्चितायै नमः । |
| नर्मदायै नमः | परप्रभायै नमः |
| नन्दनानन्दायै नमः | पितृपतये नमः |
| नन्दानन्दविवर्धिन्यै | परसैन्यविनाशिन्यै नमः |
| यशोदानन्दतनयायै नमः | परमायै नमः |
| नन्दनोद्यानवासिन्यै | परतन्त्रायै नमः |
| नागान्तकायै नमः | परमन्त्रायै नमः |
| नागवृद्धायै नमः २५० | परात्परायै नमः २७० |
| नागपत्न्यै नमः | परायै विद्यायै नमः |
| नागिन्यै नमः। | परायै सिद्ध्यै नमः |
| नमिताशेषजनतायै नमः | परास्थानप्रदायिन्यै नमः |
| नमस्कारवत्यै नमः | पुष्पायै नमः |
| नमसे नमः | नित्यं पुष्पवत्यै नमः |
| पीताम्बरायै नमः | पुष्पमालाविभूषितायै नमः |
| पार्वत्यै नमः | पुरातनायै नमः |
| पीताम्बरविभूषितायै | पूर्वपरायै नमः |
| पीतमाल्याम्बरधरायै | परसिद्धिप्रदायिन्यै नमः |
| पीताभायै नमः २६० | पीतानितम्बिन्यै नमः२८० |

| | |
|---|---|
| पीतापीनोन्नतपयस्स्तन्यै | पशुरक्तरतप्रियायै नमः । |
| प्रेमाप्रमध्यमाशेषायै | पशुमांसप्रियायै नमः |
| पद्मपत्रविलासिन्यै नमः | अपर्णायै नमः |
| पद्मावत्यै नमः | परामृतपरायणायै नमः |
| पद्मनेत्रायै नमः | पाशिन्यै नमः |
| पद्मायै नमः | पाशिकायै नमः |
| पद्ममुखीपरायै नमः । | पशुघ्न्यै नमः |
| पद्मासनायै नमः | पशुभाषिण्यै नमः। |
| पद्मप्रियायै नमः | फुल्लारविन्दवदन्यै नमः |
| पद्मरागस्वरूपिण्यै२९० | फुल्लोत्पलशरीरिण्यै ३१० |
| पावन्यै नमः | परानन्दप्रदायै नमः |
| पालिकायै नमः | वीणायै नमः |
| पात्र्यै नमः | पशुपाशविनाशिन्यै नमः। |
| परदायै नमः | फूत्कारायै नमः |
| अवरदायै नमः | फुत्परायै नमः |
| शिवायै नमः । | फेण्यै नमः |
| प्रेतसंस्थायै नमः | फुल्लेन्दीवरलोचनायै नमः |
| परानन्दायै नमः | फट्मन्त्रायै नमः |
| परब्रह्मस्वरूपिण्यै नमः | स्फटिकायै नमः |
| जिनेश्वरप्रियायै देव्यै नमः ३०० | स्वाहायै नमः ३२० |





| | |
|---|---|
| स्फोटायै नमः | विष्णुशक्त्यै नमः |
| फट्स्वरूपिण्यै नमः। | पञ्चवक्त्रायै नमः |
| स्फाटिकाघुटिकायै | शिवप्रियायै नमः । |
| घोरायै नमः | वैकुण्ठवासिन्यै देव्यै नमः |
| स्फटिकाद्रिस्वरूपिण्यै | वैकुण्ठपददायिन्यै नमः |
| वराङ्गनायै नमः | ब्रह्मरूपायै नमः |
| वरधरायै नमः | विष्णुरूपायै नमः |
| वाराह्यै नमः | परब्रह्ममहेश्वर्यै नमः। |
| वासुकीवरायै नमः । | भवप्रियायै नमः |
| बिन्दुस्थायै नमः३३० | भवोद्भावायै नमः३५० |
| बिन्दुनीवाण्यै नमः | भवरूपायै नमः |
| बिन्दुचक्रनिवासिन्यै | भवोत्तमायै नमः |
| विद्याधर्यै नमः | भवपारायै नमः |
| विशालाक्ष्यै नमः | भवाधारायै नमः |
| काशीवासिजनप्रियायै | भाग्यवत्प्रियकारिण्यै नमः। |
| वेदविद्यायै नमः | भद्रायै नमः |
| विरूपाक्ष्यै नमः | सुभद्रायै नमः |
| विश्वयुजे नमः | भवदायै नमः |
| बहुरूपिण्यै नमः | शुम्भदैत्यविनाशिन्यै नमः |
| ब्रह्मशक्त्यै नमः३४० | भवान्यै नमः ३६० |

| | |
|---|---|
| भैरव्यै नमः<br>भीमायै नमः<br>भद्रकाल्यै नमः<br>सुभद्रिकायै नमः ।<br>भगिन्यै नमः<br>भगरूपायै नमः<br>भगमानायै नमः<br>भगोत्तमायै नमः<br>भगप्रियायै नमः<br>भगवत्यै नमः ३७०<br>भगवासायै नमः<br>भगाकरायै नमः ।<br>भगसृष्टायै नमः<br>भाग्यवत्यै नमः<br>भगरूपायै नमः<br>भगासिन्यै नमः<br>भगलिङ्गप्रियायै देव्यै<br>भगलिङ्गपरायणायै नमः<br>भगलिङ्गस्वरूपायै नमः<br>भगलिङ्गविनोदिन्यै३८० | भगलिङ्गरतायै देव्यै नमः<br>भगलिङ्गनिवासिन्यै नमः।<br>भगमालायै नमः<br>भगकलायै नमः<br>भगाधारायै नमः<br>भगाम्बरायै नमः<br>भगवेगायै नमः<br>भगापूषायै नमः<br>भगेन्द्रायै नमः<br>भाग्यरूपिण्यै नमः३९०<br>भगलिङ्गाङ्गसम्भोगायै नमः<br>भगलिङ्गासवावहायै नमः<br>भगलिङ्गसमाधुर्यायै नमः<br>भगलिङ्गनिवेशितायै नमः ।<br>भगलिङ्गसुपूजायै नमः<br>भगलिङ्गसमन्वितायै नमः<br>भगलिङ्गविरक्तायै नमः<br>भगलिङ्गसमावृतायै नमः ।<br>माधव्यै नमः<br>माधवीमान्यायै नमः ४०० |





| | |
|---|---|
| मधुरायै नमः<br>मधुमानिन्यै नमः<br>मन्दहासायै नमः<br>महामायायै नमः<br>मोहिन्यै नमः<br>महदुत्तमायै नमः ।<br>महामोहायै नमः<br>महाविद्यायै नमः<br>महाघोरायै नमः<br>महास्मृत्यै नमः४१०<br>मनस्विन्यै नमः<br>मानवत्यै नमः<br>मोदिन्यै नमः<br>मधुराननायै नमः ।<br>मेनकायै नमः<br>मानिनीमान्यायै नमः<br>मणिरत्नविभूषणायै नमः<br>मल्लिकामौलिका–<br>–मालायै नमः<br>मालाधरमदोत्तमायै नमः<br>मदनासुन्दर्यै ४२० | मेधायै नमः<br>मधुमत्तायै नमः<br>मधुप्रियायै नमः<br>मत्तहंसीसमोन्नासायै नमः<br>मत्तसिंहमहासन्यै नमः।<br>महेन्द्रवल्लभायै नमः<br>भीमायै नमः<br>मौल्यञ्चमिथुनात्मजायै<br>महाकाल्या महाकाल्यै<br>महाबुद्ध्यै नमः ४३०<br>महोत्कटायै नमः ।<br>माहेश्वर्यै नमः<br>महामायायै नमः<br>महिषासुरघातिन्यै नमः<br>मधुरायै कीर्तिमत्तायै नमः<br>मत्तमातङ्गगामिन्यै नमः।<br>मदप्रियायै नमः<br>मांसरतायै नमः<br>मत्तयुक्कामकारिण्यै नमः<br>मैथुन्यवल्लभायै देव्यै ४४० |

महानन्दायै नमः
महोत्सवायै नमः ।
मरीचये नमः
मारत्यै नमः
मायायै नमः
मनोबुद्धिप्रदायिन्यै नमः
मोहायै नमः
मोक्षायै नमः
महालक्ष्मै नमः
महत्पदप्रदायिन्यै ४५०
यमरूपायै नमः
यमुनायै नमः
जयन्त्यै नमः
जयप्रदायै नमः
याम्यायै नमः
यमवत्यै नमः
युद्धायै नमः
यदोः कुलविवर्धिन्यै
रमारामायै नमः
रामपत्न्यै नमः ४६०

रत्नमालारतिप्रियायै नमः
रत्नसिंहासनस्थायै नमः
रत्नाभरणमण्डितायै नमः ।
रमण्यै नमः
रमणीयायै नमः
रत्यारसपरायणायै नमः
रतानन्दायै नमः
रतवत्यै नमः
रघूणां कुलवर्धिन्यै नमः।
रमणारिपरिभ्राज्यायै ४७०
रैधायै नमः
राधिकरत्नजायै नमः
रावीरसस्वरूपायै नमः
रात्रिराजसुखावहायै नमः ।
ऋतुजायै नमः
ऋतुदायै नमः
ऋद्धायै नमः
ऋतुरूपायै नमः
ऋतुप्रियायै नमः
रक्तप्रियायै नमः४८०





रक्तवत्यै नमः
रङ्गिण्यै नमः
रक्तदन्तिकायै नमः ।
लक्ष्म्यै नमः
लज्जायै नमः
लतिकायै नमः
लीलालग्नानिताक्षिण्यै
लीलायै नमः
लीलावत्यै नमः
लोमहर्षाह्लादन–
– पट्टिकायै ४९०
ब्रह्मस्थितायै नमः
ब्रह्मरूपायै नमः
ब्रह्मणा वेदवन्दितायै
ब्रह्मोद्भवायै नमः
ब्रह्मकलायै नमः
ब्रह्माण्यै नमः
ब्रह्मबोधिन्यै नमः।
वेदाङ्गनायै नमः
वेदरूपायै नमः
वनितायै नमः ५००

विनतावसायै नमः
बालायै नमः
युवत्यै नमः
वृद्धायै नमः
ब्रह्मकर्मपरायणायै नमः ।
विन्ध्यस्थायै नमः
विन्ध्यवास्यै नमः
बिन्दुयुग्बिन्दुभूषणायै नमः
विद्यावत्यै नमः
वेदधार्यै नमः ५१०
व्यापिकायै नमः
बर्हिण्यै कलायै नमः ।
वामाचारप्रियायै नमः
वह्नये नमः
वामाचारपरायणायै नमः
वामाचाररतायै देव्यै नमः
वामदेवप्रियोत्तमायै नमः ।
बुद्धेन्द्रियायै नमः
विबुद्धायै नमः
बुद्धाचरणमालिन्यै ५२०

बन्धमोचनतन्त्र्यै नमः
वारुणायै नमः
वरुणालयायै नमः ।
शिवायै नमः
शिवप्रियायै नमः
शुद्धायै नमः
शुद्धाङ्ग्यै नमः
शुक्लवर्णिकायै नमः
शुक्लपुष्पप्रियायै नमः
शुक्लायै नमः ५३०
शिवधर्मपरायणायै नमः
शुक्लस्थायै नमः
शुक्लिन्यै नमः
शुक्लरूपशुक्लपशु–
–प्रियायै नमः
शुक्रस्थायै नमः
शुक्रिण्यै नमः
शुक्रायै नमः
शुक्ररूपायै नमः
शुक्रिकायै नमः ।
षण्मुख्यै नमः ५४०

षडङ्गायै नमः
षट्चक्रविनिवासिन्यै नमः
षड्ग्रन्थियुक्तायै नमः
षोढायै नमः
षण्मात्रे नमः
षडात्मिकायै नमः ।
षडङ्गयुवत्यै देव्यै नमः
षडङ्गप्रकृत्यै नमः
वश्यै नमः
षडाननायै नमः ५५०
षड्रसायै नमः
षष्ठीषष्ठेश्वरीप्रियायै नमः ।
षड्जवादायै नमः
षोडश्यै नमः
षोढान्यासस्वरूपिण्यै नमः
षट्चक्रभेदनकर्यै नमः
षट्चक्रस्थस्वरूपिण्यै
षोडशस्वररूपायै नमः
षण्मुख्यै नमः
षट्पदान्वितायै नमः ५६०





सनकादिस्वरूपायै
शिवधर्मपरायणायै नमः
सिद्धसप्तस्वर्यै नमः
शुद्धायै नमः
सुरमात्रे नमः
सुरोत्तमायै नमः
सिद्धविद्यायै नमः
सिद्धमात्रे नमः
सिद्धासिद्धस्वरूपिण्यै
हरायै नमः५७०
हरिप्रियाहारायै नमः
हरिणीहारयुजे नमः
हरिरूपायै नमः
हरिधरायै नमः
हरिणाक्ष्यै नमः
हरिप्रियायै नमः
हेतुप्रियायै नमः
हेतुरतायै नमः
हिताहितस्वरूपिण्यै
क्षमायै नमः ५८०

क्षमावत्यै नमः
क्षीतायै नमः
क्षुद्रघण्टाविभूषणायै नमः
क्षयङ्कर्यै नमः
क्षितीशायै नमः
क्षीणमध्यसुशोभनायै नमः
अजायै नमः
अनन्तायै नमः
अपर्णायै नमः
अहल्याशेषशायिन्यै ५९०
स्वान्तर्गतायै नमः
साधूनामन्तरानन्दरूपिण्यै
अरूपायै नमः
अमलायै नमः
अर्धायै नमः
अनन्तगुणशालिन्यै नमः।
स्वविद्यायै नमः
विद्यकाविद्यायै नमः
विद्यायै नमः
चार्विन्दुलोचनायै ६००

Mahaperiaval Trust, Gurukrupa, Bangalore-54.

| | |
|---|---|
| अपराजितायै नमः | इन्द्राक्ष्यै नमः |
| जातवेदायै नमः | इन्द्रवज्रायै नमः |
| अजपायै नमः | इन्द्रमद्योक्षण्यै नमः |
| अमरावत्यै नमः। | ईलाकामनिवासायै नमः |
| अल्पायै नमः | ईश्वर्यै नमः |
| स्वल्पायै नमः | ईश्वरवल्लभायै नमः । |
| अनल्पाद्यायै नमः | जनन्यै नमः |
| अणिमासिद्धिदायिन्यै | ईश्वर्यै नमः |
| अष्टसिद्धिप्रदायै देव्यै | दीनाभेदायै नमः |
| रूपलक्षणसंयुतायै ६१० | ईश्वरकर्मकृते नमः६३० |
| अरविन्दमुखायै देव्यै | उमायै नमः |
| भोगसौख्यप्रदायिन्यै | कात्यायन्यै नमः |
| आदिविद्यायै नमः | ऊर्ध्वायै नमः |
| आदिभूतायै नमः | मीनायै नमः |
| आदिसिद्धिप्रदायिन्यै | उत्तरवासिन्यै नमः। |
| सीत्काररूपिण्यै देव्यै | उमापतिप्रियायै देव्यै नमः |
| सर्वासनविभूषितायै | शिवायै नमः |
| इन्द्रप्रियायै नमः | ओङ्काररूपिण्यै नमः |
| इन्द्राण्यै नमः | उरगेन्द्रशिरोरत्नायै नमः |
| इन्द्रप्रस्थनिवासिन्यै नमः६२० | उरगायै नमः ६४० |





| | |
|---|---|
| उरगवल्लभायै नमः । | ॐवदवदवाण्यै नमः |
| उद्यानवासिन्यै नमः | ॐकाराक्षरमण्डितायै नमः |
| मालायै नमः | ऐन्द्यै नमः |
| प्रशस्तमणिभूषणायै | कुलिशहस्तायै नमः |
| ऊर्ध्वदन्तोत्तमाङ्ग्यै | ॐलोकपरवासिन्यै नमः |
| उत्तमायै नमः | ॐकारमध्यबीजायै नमः |
| ऊर्ध्वकेशिन्यै नमः। | ॐनमोरूपधारिण्यै नमः। |
| उमासिद्धिप्रदायै नमः | परब्रह्मस्वरूपायै नमः |
| उरगासनसंस्थितायै | अंशुकायै नमः |
| ऋषिपुत्र्यै नमः ६५० | अंशुकवल्लभायै ६७० |
| ऋषिच्छन्दायै नमः | ॐकारायै नमः |
| ऋद्धिसिद्धिप्रदायिन्यै | अःफड्मन्त्रायै नमः |
| उत्सवोत्सवसीमन्तायै | अक्षाक्षरविभूषितायै नमः । |
| कामिकायै नमः | अमन्त्रायै नमः |
| गुणान्वितायै नमः | मन्त्ररूपायै नमः |
| एलायै नमः | पदशोभासमन्वितायै नमः |
| एकारविद्यायै नमः | प्रणवोङ्काररूपायै नमः |
| एणीविद्याधरायै नमः | प्रणवोच्चारभाजे नमः |
| ॐकारावलयोपेतायै | ह्रींकाररूपायै नमः |
| ॐकारपरमायै कलायै ६६० | ह्रींकार्यै नमः६८० |

वाग्बीजाक्षरभूषणायै
हृल्लेखासिद्धियोगायै
हृत्पद्मासनसंस्थितायै
बीजाख्यायै नमः
नेत्रहृदयायै नमः
ह्रींबीजायै नमः
भुवनेश्वर्यै नमः
क्लींकामराजायै नमः
क्लिन्नायै नमः
चतुर्वर्गफलप्रदायै ६९०
क्लींक्लींक्लींरूपिकायै देव्यै नमः
क्रींक्रींक्रींनामधारिण्यै
कमलाशक्तिबीजायै
पाशाङ्कुशविभूषितायै
श्रींश्रींकारायै नमः
महाविद्यायै नमः
श्रद्धायै नमः
श्रद्धावत्यै नमः
ॐऐंक्लींह्रींश्रींपरायै
क्लींकार्यै नमः ७००

परमायै कलायै नमः ।
ह्रींक्लींश्रींकारस्वरूपायै
सर्वकर्मफलप्रदायै नमः
सर्वाढ्यायै नमः
सर्वदेव्यै नमः
सर्वसिद्धिप्रदायै नमः
सर्वज्ञायै नमः
सर्वशक्त्यै नमः
वाग्विभूतिप्रदायिन्यै नमः
सर्वमोक्षप्रदायै देव्यै ७१०
सर्वभोगप्रदायिन्यै नमः।
गुणेन्द्रवल्लभायै वामायै
सर्वशक्तिप्रदायिन्यै नमः
सर्वानन्दमय्यै नमः
सर्वसिद्धिप्रदायिन्यै नमः।
सर्वचक्रेश्वर्यै देव्यै नमः
सर्वसिद्धेश्वर्यै नमः
सर्वप्रियङ्कर्यै नमः
सर्वसौख्यप्रदायिन्यै नमः।
सर्वानन्दप्रदायै देव्यै ७२०





ब्रह्मानन्दप्रदायिन्यै नमः
मनोवाञ्छितदात्र्यै नमः
मनोबुद्धिसमन्वितायै
अकारादिक्षकारान्तायै
दुर्गायै नमः
दुर्गार्तिनाशिन्यै नमः
पद्मनेत्रायै नमः
सुनेत्रायै नमः
स्वधास्वाहावषट्कर्यै
स्वर्वर्गायै नमः ७३०
देववर्गायै नमः
तवर्गायै नमः
समन्वितायै नमः
अन्तस्थायै नमः
वेश्मरूपायै नमः
नवदुर्गायै नमः
नरोत्तमायै नमः ।
तत्त्वसिद्धिप्रदायै नमः
नीलायै नमः
नीलपताकिन्यै ७४०

नित्यरूपायै नमः
निशाकार्यै नमः
स्तम्भिन्यै नमः
मोहिन्यै नमः
वशङ्कर्यै नमः
उच्चाट्यै नमः
उन्माद्यै नमः
कर्षिण्यै नमः
मातङ्ग्यै नमः
मधुमत्तायै नमः ७५०
अणिमायै नमः
लघिमायै नमः
सिद्धायै नमः
मोक्षप्रदायै नित्यायै नमः
नित्यानन्दप्रदायिन्यै नमः
रक्ताङ्ग्यै नमः
रक्तनेत्रायै नमः
रक्तचन्दनभूषितायै नमः ।
स्वल्पसिद्ध्यै नमः
सुकल्पायै नमः ७६०

| | |
|---|---|
| दिव्यचारणशुक्रभायै | पूर्वायै नमः |
| सङ्क्रान्त्यै नमः | उत्तरायै नमः |
| सर्वविद्यायै नमः | परिपूर्णिमायै नमः |
| सप्तवासरभूषितायै | खड्गिन्यै नमः |
| प्रथमायै नमः | चक्रिण्यै नमः |
| द्वितीयायै नमः | घोरायै नमः |
| तृतीयायै नमः | गदिन्यै नमः |
| चतुर्थिकायै नमः | शूलिन्यै नमः |
| पञ्चम्यै नमः | भुशुण्डीचापिन्यै नमः |
| षष्ठ्यै नमः७७० | बाणायै नमः ७९० |
| विशुद्धायै सप्तम्यै नमः | सर्वायुधविभूषणायै नमः |
| अष्टम्यै नमः | कुलेश्वर्यै नमः |
| नवम्यै नमः | कुलवत्यै नमः |
| दशम्यै नमः | कुलाचारपरायणायै नमः । |
| एकादश्यै नमः | कुलकर्मसुरक्तायै नमः |
| द्वादश्यै नमः | कुलाचारप्रवर्धिन्यै नमः |
| त्रयोदश्यै नमः | कीर्त्यै नमः |
| चतुर्दश्यै नमः | श्रियै नमः |
| पूर्णिमायै नमः । | रमायै नमः |
| अमावास्यायै ७८० | रामायै नमः८०० |





| | |
|---|---|
| धर्मायै सततं नमः । | क-च-ट-त-पवर्णिकायै |
| क्षमायै नमः | जयिन्यै नमः |
| धृत्यै नमः | जययुक्तायै नमः |
| स्मृत्यै नमः | जयदायै नमः |
| मेधायै नमः | जृम्भिण्यै नमः |
| कल्पवृक्षनिवासिन्यै | स्राविण्यै नमः |
| उग्रायै नमः | द्राविण्यै देव्यै नमः |
| उग्रप्रभायै नमः | भेरुण्डायै नमः |
| गौर्यै नमः | विन्ध्यवासिन्यै नमः |
| वेदविद्याविबोधिन्यै८१० | ज्योतिर्भूतायै नमः ८३० |
| साध्यायै नमः | जयदायै नमः |
| सिद्धायै नमः | ज्वालामालासमाकुलायै |
| सुसिद्धायै नमः | भिन्नाभिन्नप्रकाशायै नमः |
| विप्ररूपायै नमः | विभिन्नाभिन्नरूपिण्यै नमः |
| काल्यै नमः | अश्विन्यै नमः |
| कराल्यै नमः | भरण्यै नमः |
| काल्यायै कलायै नमः | नक्षत्रसम्भवानिलायै नमः |
| दैत्यविनाशिन्यै नमः। | काश्यप्यै नमः |
| कौलिन्यै नमः | विनताख्यातायै नमः |
| कालिक्यै नमः ८२० | दितिजायै नमः ८४० |

| | |
|---|---|
| अदित्यै नमः | चतुर्मुख्यै नमः |
| कीर्त्यै नमः | चतुर्वेदायै नमः |
| कामप्रियायै देव्यै नमः | चतुर्विद्यायै नमः |
| कीर्त्या कीर्तिविवर्धिन्यै | चतुर्मुखायै नमः। |
| सद्योमांससमालब्धायै | चतुर्गणायै नमः |
| सद्यश्छिन्नासिशङ्करायै | चतुर्मात्रे नमः |
| दक्षिणायै दिशे नमः | चतुर्वर्गफलप्रदायै नमः |
| उत्तरायै दिशे नमः | धात्रीविधात्रीमिथुनायै नमः |
| पूर्वायै दिशे नमः | नार्यै नमः |
| पश्चिमायै दिशे ८५० | नायकवासिन्यै नमः८७० |
| अग्निनैर्ऋति– | सुरामुदामुदवत्यै नमः |
| –वायव्येशान्यादिशेनमः | मेदिन्यै नमः |
| स्मृतायै नमः | मेनकात्मजायै नमः |
| ऊर्ध्वाङ्गाधोगतायै नमः | ऊर्ध्वकाल्यै नमः |
| श्वेतायै नमः | सिद्धिकाल्यै नमः |
| कृष्णायै नमः | दक्षिणाकालिकायै नमः |
| रक्तायै नमः | शिवायै नमः। |
| पीतकायै नमः। | नीलायै सरस्वत्यै नमः |
| चतुर्वर्गायै नमः | सा त्वं बगलायै नमः |
| चतुर्वर्णायै नमः | छिन्नमस्तकायै नमः८८० |
| चतुर्मात्रात्मिकाक्षरायै नमः ८६० | |





| | |
|---|---|
| सर्वेश्वर्यै नमः | जयन्त्यै नमः |
| सिद्धविद्यायै परायै नमः | जयदायै नित्यायै नमः |
| परमदेवतायै नमः। | ज्वलदग्निसमप्रभायै नमः |
| हिङ्गुलायै नमः | विद्याधरायै नमः |
| हिङ्गुलाङ्ग्यै नमः | बिम्बोष्ठ्यै नमः |
| हिङ्गुलाधरवासिन्यै नमः | कैलासाचलवासिन्यै नमः। |
| हिङ्गुलोत्तमवर्णाभायै | विभवायै नमः |
| हिङ्गुलाभरणायै नमः | वडवाग्नये नमः |
| जाग्रत्यै नमः | अग्निहोत्रफलप्रदायै नमः |
| जगन्मात्रे नमः ८९० | मन्त्ररूपायै परायै देव्यै ९१० |
| जगदीश्वरवल्लभायै | गुरुरूपिण्यै नमः |
| जनार्दनप्रियायै देव्यै | गयायै नमः |
| जययुक्तायै नमः | गङ्गायै नमः |
| जयप्रदायै नमः। | गोमत्यै नमः |
| जगदानन्दकार्यै नमः | प्रभासायै नमः |
| जगदाह्लादकारिण्यै नमः | पुष्करायै नमः |
| ज्ञानदानकर्यै नमः | विन्ध्याचलरतायै देव्यै |
| यज्ञायै नमः | विन्ध्याचलनिवासिन्यै |
| जानक्यै नमः | बह्वै नमः |
| जनकप्रियायै ९०० | बहुसुन्दर्यै नमः ९२० |

| | |
|---|---|
| कंसासुरविनाशिन्यै | सदाशिवायै नमः |
| शूलिन्यै नमः | उमायै क्षेमायै नमः |
| शूलहस्तायै नमः | चण्डिकायै नमः |
| वज्रायै नमः | चण्डविक्रमायै नमः |
| वज्रहरायै नमः | सर्वदेवमय्यै देव्यै नमः |
| दुर्गायै नमः | सर्वागमभयापहायै नमः । |
| शिवायै नमः | ब्रह्मेशविष्णुनमितायै नमः |
| शान्तिकर्यै नमः | सर्वकल्याणकारिण्यै नमः |
| ब्रह्माण्यै नमः | योगिनीयोगमात्रे नमः |
| ब्राह्मणप्रियायै ९३० | योगीन्द्रहृदयस्थितायै ९५० |
| सर्वलोकप्रणेत्र्यै नमः | योगिजायायै नमः |
| सर्वरोगहरायै नमः | योगवत्यै नमः |
| मङ्गलायै नमः | योगीन्द्रानन्दयोगिन्यै नमः |
| शोभनायै नमः | इन्द्रादिनमितायै देव्यै नमः |
| शुद्धायै नमः | ईश्वर्यै नमः |
| निष्कलायै नमः | ईश्वरप्रियायै नमः । |
| परमायै कलायै नमः | विशुद्धिदायै नमः |
| विश्वेश्वर्यै नमः | भयहरायै नमः |
| विश्वमात्रे नमः | भक्तद्वेषिभयङ्कर्यै नमः |
| ललितायै वासिताननायै नमः ९४० | भववेषायै नमः ९६० |

Mahaperiaval Trust, Gurukrupa, Bangalore-54.



| | |
|---|---|
| कामिन्यै नमः | पिङ्गाक्ष्यै नमः |
| भेरुण्डायै नमः | वैष्णव्यै नमः |
| भवकारिण्यै नमः। | शङ्कर्यै नमः |
| बलभद्रप्रियाकारायै | चन्द्रप्रियायै नमः |
| संसारार्णवतारिण्यै नमः | चन्द्ररतायै नमः |
| पञ्चभूतायै नमः | चन्दनारण्यवासिन्यै नमः |
| सर्वभूतायै नमः | चन्दनेन्द्रसमायुक्तायै नमः |
| विभूत्यै नमः | चण्डदैत्यविनाशिन्यै नमः। |
| भूतिधारिण्यै नमः। | सर्वेश्वर्यै नमः |
| सिंहवाहायै नमः:९७० | यक्षिण्यै नमः ९९० |
| महामोहायै नमः | किरात्यै नमः |
| मोहपाशविनाशिन्यै | राक्षस्यै नमः |
| मन्दुरायै नमः | महाभोगवत्यै देव्यै नमः |
| मदिरायै नमः | महामोक्षप्रदायिन्यै नमः। |
| मुद्रायै नमः | विश्वहन्त्र्यै नमः |
| मुद्रामुद्गरधारिण्यै नमः। | विश्वरूपायै नमः |
| सावित्र्यै नमः | विश्वसंहारकारिण्यै नमः |
| महादेव्यै नमः | सर्वलोकानां धात्र्यै नमः |
| परप्रियविनायिकायै | हितकारणकामिन्यै नमः |
| यमदूत्यै नमः ९८० | कमलायै नमः:१००० |

Mahaperiaval Trust, Gurukrupa, Bangalore-54.

| | |
|---|---|
| सूक्ष्मदायै देव्यै नमः<br>धात्र्यै नमः<br>हरविनाशिन्यै नमः<br>सुरेन्द्रपूजितायै नमः<br>सिद्धायै नमः<br>महातेजोवत्यै नमः<br>परारूपवत्यै देव्यै नमः<br>त्रैलोक्याकर्षकारिण्यै १००८<br>******* | |





॥ श्रीमातङ्गीशतनामस्तोत्रम् ॥_

| | |
|---|---|
| महामत्तमातङ्गिनीसिद्धि– | भीमरूपायै नमः । |
| –रूपायै नमः | भवान्यै नमः |
| योगिन्यै नमः | महाकौशिक्यै नमः |
| भद्रकाल्यै नमः रमायै नमः | कोशपूर्णायै नमः |
| भवान्यै नमः | किशोरीकिशोरप्रिया– |
| भवप्रीतिदायै नमः | –नन्देहायै नमः |
| भूतियुक्तायै नमः | महाकारणाकारणायै |
| भवाराधितायै नमः | कर्मशीलायै नमः |
| भूतिसम्पत्कर्यै नमः | कपालिप्रसिद्धायै नमः |
| धनाधीशमात्रे नमः१० | महासिद्धखण्डायै ३० |
| धनागारदृष्ट्यै नमः | मकारप्रियायै नमः |
| धनेशार्चितायै नमः | मानरूपायै नमः |
| धीरवापीवराङ्ग्यै नमः | महेश्यै नमः |
| प्रकृष्टप्रभारूपिण्यै नमः | महोल्लासिनीलास्य– |
| कामरूपप्रहृष्टायै नमः | –लीलालयाङ्ग्यै नमः |
| महाकीर्तिदायै नमः | क्षमाक्षेमशीलायै नमः |
| कर्णनाल्यै नमः | क्षपाकारिण्यै नमः |
| करालीभगाघोररूपायै नमः | अक्षयप्रीतिदायै नमः |
| भगाङ्ग्यै नमः | भूतियुक्तायै नमः |
| भगाह्वायै नमः २० | भवान्यै नमः। |
| भगप्रीतिदायै नमः | भवाराधितायै नमः४० |

भूतिसत्यात्मिकायै नमः
प्रभोद्भासितायै नमः
भानुभास्वत्करायै नमः
धराधीशमात्रे नमः
धरागारदृष्ट्यै नमः
धरेशार्चितायै नमः
धीवराधीवराङ्ग्यै नमः।
प्रकृष्टप्रभारूपिण्यै नमः
प्राणरूपप्रकृष्टस्वरूपायै
स्वरूपप्रियायै नमः ५०
चलत्कुण्डलाकामिन्यै
कान्तयुक्तायै नमः
कपालाचलायै नमः
कालकोद्धारिण्यै नमः
कदम्बप्रियायै नमः
कोटरीकोटदेहायै नमः
क्रमायै नमः
कीर्तिदायै नमः
कर्णरूपायै नमः
काक्ष्म्यै नमः ६०

क्षमाङ्ग्यै नमः
क्षयप्रेमरूपायै नमः
क्षपायै नमः
क्षयाक्षायै नमः
क्षयाह्वायै नमः
क्षयप्रान्तरायै नमः
क्षवत्कामिन्यै नमः
क्षारिणीक्षीरपूर्णायै नमः
शिवाङ्ग्यै नमः
शाकम्भरीशाकदेहायै ७०
महाशाकयज्ञायै नमः
फलप्राशकायै नमः
शकाह्वायै नमः
शकाह्वाशकाख्यायै
शकायै नमः
शकाक्षान्तरोषायै नमः
सुरोषायै नमः
सुरेखायै नमः
महाशेषयज्ञोपवीत–
–प्रियायै नमः
जयन्त्यै नमः ८०





जयायै नमः
जाग्रतीयोग्यरूपायै नमः
जयाङ्गायै नमः
जपध्यानसन्तुष्टसंज्ञायै
जयप्राणरूपायै नमः
जयस्वर्णदेहायै नमः
जयज्वालिनीयामिन्यै नमः
याम्यरूपायै नमः
जगन्मातृरूपायै नमः
जगद्रक्षणायै नमः९०
स्वधावौषडन्तायै नमः
विलम्बाविलम्बायै नमः।
षडङ्गायै नमः
महालम्बरूपासिहस्तायै
पदाहारिणीहारिण्यै नमः
हारिण्यै नमः
महामङ्गलायै नमः
मङ्गलप्रेमकीर्त्यै नमः
निशुम्भच्छिदायै नमः
शुम्भदर्पत्वहायै नमः१००

आनन्दबीजादिमुक्त–
–स्वरूपायै नमः
चण्डमुण्डापदामुख्य–
–चण्डायै नमः
प्रचण्डाप्रचण्डायै नमः
महाचण्डवेगायै नमः
चलच्चामरायै नमः
चामराचन्द्रकीर्त्यै नमः
सुचामीकराचित्र–
–भूषोज्ज्वलाङ्ग्यै नमः
सुसङ्गीतगीतायै नमः१०८
*******

| ॥ श्रीमातङ्गीसहस्रनामस्तोत्रम् ॥ | |
|---|---|
| ॐ सुमुख्यै नमः | वनचर्यै नमः |
| शेमुष्यै नमः | वन्यै नमः |
| सेव्यायै नमः | वनविनोदिन्यै नमः |
| सुरसायै नमः | वेगिन्यै नमः |
| शशिशेखरायै नमः । | वेगदायै नमः |
| समानास्यायै नमः | वेगायै नमः |
| साधन्यै नमःच | बगलस्थायै नमः |
| समस्तसुरसन्मुख्यै नमः | बलाधिकायै नमः । |
| सर्वसम्पत्तिजनन्यै नमः | काल्यै नमः |
| सम्पदायै नमः १० | कालप्रियायै नमः ३० |
| सिन्धुसेविन्यै नमः। | केल्यै नमः |
| शम्भुसीमन्तिन्यै नमः | कमलायै नमः |
| सौम्यायै नमः | कालकामिन्यै नमः |
| समाराध्यायै नमः | कमलायै नमः |
| सुधारसायै नमः | कमलस्थायै नमः |
| सारङ्गायै नमः | कमलस्थायै नमः |
| सवल्यै नमः | कलावत्यै नमः। |
| वेलायै नमः | कुलीनायै नमः |
| लावण्यवनमालिन्यै नमः। | कुटिलायै नमः |
| वनजाक्ष्यै नमः २० | कान्तायै नमः ४० |





| | |
|---|---|
| कोकिलायै नमः | कुमुदप्रीतिवर्धिन्यै नमः। |
| कलभाषिण्यै नमः | कुण्डप्रियायै नमः |
| कीरायै नमः | कुण्डरुच्यै नमः |
| केलिकरायै नमः | कुरङ्गनयनायै नमः |
| काल्यै नमः | कुलायै नमः |
| कपालिन्यै नमः | कुन्दबिम्बालिनदिन्यै |
| कालिकायै नमः । | कुसुम्भकुसुमाकरायै |
| केशिन्यै नमः | काञ्च्यै नमः |
| कुशावर्तायै नमः | कनकशोभाढ्यायै नमः |
| कौशाम्भ्यै नमः ५० | क्वणत्किङ्किणिकाकट्यै ७० |
| केशवप्रियायै नमः | कठोरकरणायै नमः |
| काल्यै नमः | काष्ठायै नमः |
| काश्यै नमः | कौमुद्यै नमः |
| महाकालसङ्काशायै नमः | कण्ठवत्यै नमः |
| केशदायिन्यै नमः। | कपर्दिन्यै नमः |
| कुण्डलायै नमः | कपटिन्यै नमः |
| कुलस्थायै नमः | कठिन्यै नमः |
| कुण्डलाङ्गदमण्डितायै | कलकण्ठिन्यै नमः |
| कुण्डपद्मायै नमः | करिहस्तायै नमः |
| कुमुदिन्यै नमः ६० | कुमार्यै नमः ८० |

| | |
|---|---|
| कुरूढकुसुमप्रियायै नमः । | कृपायुक्तायै नमः |
| कुञ्जरस्थायै नमः | क्रतवे नमः |
| कुञ्जरतायै नमः | क्रतुकरप्रियायै नमः । |
| कुम्भ्यै नमः | कात्यायन्यै नमः |
| कुम्भस्तन्यै नमः | कृत्तिकायै नमः |
| कलायै नमः | कार्तिक्यै नमः |
| कुम्भीकाङ्गायै नमः | कुशवर्तिन्यै नमः |
| करभोर्वै नमः | कामपत्न्यै नमः |
| कदलीकुशशायिन्यै नमः। | कामदात्र्यै नमः |
| कुपितायै नमः ९० | कामेश्यै नमः ११० |
| कोटरस्थायै नमः | कामवन्दितायै नमः । |
| कङ्काल्यै नमः | कामरूपायै नमः |
| कन्दलालयायै नमः | कामरत्यै नमः |
| कपालवसिन्यै नमः | कामाख्यायै नमः |
| केश्यै नमः | ज्ञानमोहिन्यै नमः |
| कम्पमानशिरोरुहायै नमः । | खड्गिन्यै नमः |
| कादम्बर्यै नमः | खेचर्यै नमः |
| कदम्बस्थायै नमः | खञ्जायै नमः |
| कुङ्कुमप्रेमधारिण्यै नमः | खञ्जरीटेक्षणायै नमः |
| कुटुम्बिन्यै नमः १०० | खगायै नमः १२० |





| | |
|---|---|
| खरगायै नमः | गोतम्यै नमः |
| खरनादायै नमः | गौतम्यै नमः |
| खरस्थायै नमः | गङ्गायै नमः |
| खेलनप्रियायै नमः | गयायै नमः |
| खरांशवे नमः | गगनगायै नमः |
| खेलन्यै नमः | गारुड्यै नमः |
| खट्वायै नमः | गरुडध्वजायै नमः । |
| खरायै नमः | गीतायै नमः |
| खट्वाङ्गधारिण्यै नमः। | गीतप्रियायै नमः |
| खरखण्डिन्यै नमः१३० | गेयायै नमः१५० |
| ख्यात्यै नमः | गुणप्रीत्यै नमः |
| खण्डितायै नमः | गुरवे नमः |
| खण्डनप्रियायै नमः | गिर्यै नमः |
| खण्डप्रियायै नमः | गवे नमः |
| खण्डखाद्यायै नमः | गौर्यै नमः |
| खण्डसिन्धवे नमः | गण्डसदनायै नमः |
| खण्डिन्यै नमः। | गोकुलायै नमः |
| गङ्गायै नमः | गोप्रतारिण्यै नमः। |
| गोदावर्यै नमः | गोप्त्र्यै नमः |
| गौर्यै नमः १४० | गोविन्दिन्यै नमः१६० |

| | |
|---|---|
| गूढायै नमः | घोटायै नमः |
| गूढविग्रस्तगुञ्जिन्यै नमः | घोटकवाहिन्यै नमः। |
| गजगायै नमः | घोररूपायै नमः |
| गोपिन्यै नमः | घोरायै नमः |
| गोप्यै नमः | घृतप्रीत्यै नमः |
| गोक्षायै नमः | घृताञ्जन्यै नमः |
| जयप्रियायै नमः | घृताच्यै नमः |
| गणायै नमः । | घृतवृष्ट्यै नमः |
| गिरिभूपालदुहितायै नमः | घण्टायै नमः |
| गोगायै नमः१७० | घटघटावृतायै नमः १९० |
| गोकुलवासिन्यै नमः | घटस्थायै नमः |
| घनस्तन्यै नमः | घटनायै नमः |
| घनरुच्यै नमः | घातकर्यै नमः |
| घनोरवे नमः | घातनिवारिण्यै नमः |
| घननिस्वनायै नमः । | चञ्चरीक्यै नमः |
| घुङ्कारिण्यै नमः | चकोर्यै नमः |
| घुक्षकर्यै नमः | चामुण्डायै नमः |
| घूघूकपरिवारितायै नमः | चीरधारिण्यै नमः। |
| घण्टानादप्रियायै नमः | चातुर्यै नमः |
| घण्टायै नमः १८० | चपलायै नमः२०० |





| | |
|---|---|
| चञ्चवे नमः | तच्चिन्तात्तायै नमः |
| चितायै नमः | चिञ्चामूलनिवासिन्यै |
| चिन्तामणिस्थितायै नमः | छुरिकायै नमः |
| चातुर्वर्ण्यमय्यै नमः | छत्रमध्यस्थायै नमः |
| चञ्चवे नमः | छिन्दायै नमः |
| चोराचार्य्यायै नमः | छिन्दाकर्यै नमः |
| चमत्कृत्यै नमः | छिदायै नमः |
| चक्रवर्तिवध्वै नमः | छुच्छुन्दर्यै नमः |
| चित्रायै नमः | छलप्रीत्यै नमः |
| चक्राङ्ग्यै नमः २१० | छुच्छुन्दरनिभस्वनायै नमः२३० |
| चक्रमोदिन्यै नमः | छलिन्यै नमः |
| चेतश्चर्यै नमः | छत्रदायै नमः |
| चित्तवृत्यै नमः | छिन्नायै नमः |
| चेतनायै नमः | छिण्टिच्छेदकर्यै नमः |
| चेतनप्रियायै नमः | छटायै नमः |
| चापिन्यै नमः | छद्मिन्यै नमः |
| चम्पकप्रीत्यै नमः | छान्दस्यै नमः |
| चण्डायै नमः | छायायै नमः |
| चण्डालवासिन्यै नमः | छर्वै नमः |
| चिरञ्जीविन्यै नमः२२० | छन्दाकर्यै नमः २४० |

| | |
|---|---|
| जयदायै नमः | जीमूतसदृशीरुच्यै नमः |
| जयदायै नमः | जन्यायै नमः |
| जात्यै नमः | जनहितायै नमः |
| जायिन्यै नमः | जायायै नमः |
| जामलायै नमः | जन्मभुवे नमः |
| जत्वै नमः | जम्भस्यै नमः |
| जम्बूप्रियायै नमः | जभुवे नमः |
| जीवनस्थायै नमः | जयदायै नमः |
| जङ्गमायै नमः | जगदावासायै नमः |
| जङ्गमप्रियायै नमः२५० | जायिन्यै नमः२७० |
| जपापुष्पप्रियायै नमः | ज्वरकृच्छ्रजिते |
| जप्यायै नमः | जपायै नमः |
| जगज्जीवायै नमः | जपत्यै नमः |
| जगज्जन्यै नमः | जप्यायै नमः |
| जगते नमः | जपार्हायै नमः |
| जन्तुप्रधानायै नमः | जायिन्यै नमः |
| जगज्जीवपरायै नमः | जनायै नमः। |
| जपायै नमः। | जालन्धरमयीजानवे |
| जातिप्रियायै नमः | जलौकायै नमः |
| जीवनस्थायै नमः२६० | जाप्यभूषणायै २८० |





| | |
|---|---|
| जगज्जीवमय्यै नमः | जालनाशिन्यै नमः |
| जीवायै नमः | जगत्क्षोभकर्यै नमः |
| जरत्कारवे नमः | जात्यै नमः |
| जनप्रियायै नमः। | जगत्क्षोभविनाशिन्यै |
| जगत्यै नमः | जनापवादायै नमः |
| जननिरतायै नमः | जीवायै नमः |
| जगच्छोभाकर्यै नमः | जननीगृहवासिन्यै नमः |
| जवायै नमः | जनानुरागायै नमः |
| जगतीत्राणकृज्जङ्घायै नमः | जानुस्थायै नमः |
| जातीफलविनोदिन्यै २९० | जलवासायै नमः ३१० |
| जातीपुष्पप्रियायै नमः | जलार्तिकृते नमः |
| ज्वालायै नमः | जलजायै नमः |
| जातिहायै नमः | जलवेलायै नमः |
| जातिरूपिण्यै नमः | जलचक्रनिवासिन्यै |
| जीमूतवाहनरुच्यै नमः | जलमुक्तायै नमः |
| जीमूतायै नमः | जलारोहायै नमः |
| जीर्णवस्त्रकृते नमः | जलजायै नमः |
| जीर्णवस्त्रधरायै नमः | जलजेक्षणायै नमः। |
| जीर्णायै नमः | जलप्रियायै नमः |
| ज्वलत्यै नमः ३०० | जलौकायै नमः ३२० |

Mahaperiaval Trust, Gurukrupa, Bangalore-54.

जलशोभावत्यै नमः
जलविस्फूर्जितवपुषे नमः
ज्वलत्पावकशोभिन्यै
झिञ्झायै नमः
झिल्लमय्यै नमः
झिञ्झायै नमः
झणत्कारकर्यै नमः
जयायै नमः
झञ्झ्यै नमः
झम्पकर्यै नमः ३३०
झम्पायै नमः
झम्पत्रासनिवारिण्यै नमः।
टङ्कारस्थायै नमः
टङ्कर्यै नमः
टङ्कारकरणांहसायै नमः
टङ्कारोट्टकृतष्ठीवायै नमः
डिण्डीरवसनावृतायै नमः ।
डाकिन्यै नमः
डामिर्यै नमः
डिण्डिमध्वनिनादिन्यै३४०

डकारनिस्स्वनरुचये
तपिन्यै नमः
तापिन्यै नमः
तरुण्यै नमः
तुन्दिलायै नमः
तुन्दायै नमः
तामस्यै नमः
तमःप्रियायै नमः
ताम्रायै नमः
ताम्रवत्यै नमः ३५०
तन्तवे नमः
तुन्दिलायै नमः
तुलसम्भवायै नमः ।
तुलाकोटिसुवेगायै नमः
तुल्यकामायै नमः
तुलाश्रयायै नमः
तुदिन्यै नमः
तुनिन्यै नमः
तुम्बायै नमः
तुल्यकालायै ३६०





तुलाश्रयायै नमः ।
तुमुलायै नमः
तुलजायै नमः
तुल्यायै नमः
तुलादानकर्यै नमः
तुल्यवेगायै नमः
तुल्यगत्यै नमः
तुलाकोटिनिनादिन्यै नमः।
ताम्रोष्ठायै नमः
ताम्रपर्ण्यै नमः३७०
तमःसङ्क्षोभकारिण्यै नमः
त्वरितायै नमः
त्वरहायै नमः
तीरायै नमः
तारकेश्यै नमः
तमालिन्यै नमः।
तमोदानवत्यै नमः
ताम्रतालस्थानवत्यै नमः
तम्यै नमः
तामस्यै नमः ३८०

तमिस्रायै नमः
तीव्रायै नमः
तीव्रपराक्रमायै नमः ।
तटस्थायै नमः
तिलतैलाक्तायै नमः
तरुण्यै नमः
तपनद्युत्यै नमः
तिलोत्तमायै नमः
तिलकृते नमः
तारकाधीशशेखरायै३९०
तिलपुष्पप्रियायै नमः
तारायै नमः
तारकेशकुटुम्बिन्यै नमः
स्थाणुपत्न्यै नमः
स्थिरकर्यै नमः
स्थूलसम्पद्विवर्धिन्यै
स्थित्यै नमः
स्थैर्यस्थविष्ठायै नमः
स्थपत्यै नमः
स्थूलविग्रहायै नमः४००

Mahaperiaval Trust, Gurukrupa, Bangalore-54.

| | |
|---|---|
| स्थूलस्थलवत्यै नमः | देवतानतायै नमः |
| स्थाल्यै नमः | दोलाक्रीडायै नमः |
| स्थलसङ्गविवर्धिन्यै नमः। | दयालवे नमः |
| दण्डिन्यै नमः | दम्पतीभ्यां नमः |
| दन्तिन्यै नमः | देवतामय्यै नमः |
| दामायै नमः | दशादीपस्थितायै नमः |
| दरिद्रायै नमः | दोषादोषहायै नमः |
| दीनवत्सलायै नमः | दोषकारिण्यै नमः। |
| देवायै नमः | दुर्गायै नमः |
| देववध्वै नमः ४१० | दुर्गार्तिशमन्यै नमः ४३० |
| दित्यायै नमः | दुर्गम्यायै नमः |
| दामिन्यै नमः | दुर्गवासिन्यै नमः |
| देवभूषणायै नमः । | दुर्गन्धनाशिन्यै नमः |
| दयायै नमः | दुस्स्थायै नमः |
| दमवत्यै नमः | दुःखप्रशमकारिण्यै |
| दीनवत्सलायै नमः | दुर्गन्धायै नमः |
| दाडिमस्तन्यै नमः | दुन्दुभीध्वान्तायै नमः |
| देवमूर्तिकरायै नमः | दूरस्थायै नमः |
| दैत्यायै नमः | दूरवासिन्यै नमः |
| दारिण्यै नमः ४२० | दरदायै नमः ४४० |





| | |
|---|---|
| दरदात्र्यै नमः | नन्दिनीनन्दबालिकायै |
| दुर्व्याधदयितायै नमः | नवीनायै नमः |
| दम्यै नमः | नर्मदायै नमः |
| धुरन्धरायै नमः | नर्मनेमये नमः |
| धुरीणायै नमः | नियमनिस्वनायै नमः । |
| धौरेय्यै नमः | निर्मलायै नमः |
| धनदायिन्यै नमः | निगमाधारायै नमः |
| धीरारवायै नमः | निम्नगायै नमः |
| धरित्र्यै नमः | नग्नकामिन्यै नमः |
| धर्मदायै नमः ४५० | नीलायै नमः ४७० |
| धीरमानसायै नमः । | निरत्नायै नमः |
| धनुर्धरायै नमः | निर्वाणायै नमः |
| धमन्यै नमः | निर्लोभायै नमः |
| धमनीधूर्तविग्रहायै नमः | निर्गुणायै नमः |
| धूम्रवर्णायै नमः | नत्यै नमः । |
| धूम्रपानायै नमः | नीलग्रीवायै नमः |
| धूमलायै नमः | निरीहायै नमः |
| धूममोदिन्यै नमः। | निरञ्जनजनायै नमः |
| नन्दिन्यै नमः | नवायै नमः |
| नन्दिनीनन्दायै नमः:४६० | निर्गुण्डिकायै ४८० |

| | |
|---|---|
| निर्गुण्डायै नमः | पुष्टिवर्धिन्यै नमः |
| निर्नासायै नमः | पुष्पिण्यै नमः |
| नासिकाभिधायै नमः । | पुस्तककरायै नमः |
| पताकिन्यै नमः | पूर्णिमातलवासिन्यै नमः। |
| पताकायै नमः | पेश्यै नमः |
| पत्रप्रीत्यै नमः | पाशकर्यै नमः |
| पयस्विन्यै नमः | पाशायै नमः |
| पीनायै नमः | पांशुहायै नमः |
| पीनस्तन्यै नमः | पांशुलायै नमः |
| पत्न्यै नमः ४९० | पशवे नमः ५१० |
| पवनाश्यै नमः | पट्वै नमः |
| निशामय्यै नमः | पराशायै नमः |
| परायै नमः | परशुधारिण्यै नमः |
| परपरायै काल्यै नमः | पाशिन्यै नमः |
| पारकृत्यभुजप्रियायै नमः | पापघ्न्यै नमः |
| पवनस्थायै नमः | पतिपत्न्यै नमः |
| पवनायै नमः | पतितायै नमः |
| पवनप्रीतिवर्धिन्यै नमः। | पतितापिन्यै नमः |
| पशुवृद्धिकर्यै नमः | पिशाच्यै नमः |
| पुष्पपोषकायै नमः ५०० | पिशाचघ्न्यै नमः ५२० |





| | |
|---|---|
| पिशिताशनतोषिण्यै नमः। | पिचुमन्दायै नमः |
| पानदायै नमः | पुण्डरीकायै नमः |
| पानपात्र्यै नमः | पिक्यै नमः |
| पानदानकरोद्यतायै नमः | पिङ्गललोचनायै नमः । |
| पेयायै नमः | प्रियङ्गुमञ्जर्यै नमः |
| प्रसिद्धायै नमः | पिण्ड्यै नमः |
| पीयूषायै नमः | पण्डितायै नमः |
| पूर्णायै नमः | पाण्डुरप्रभायै नमः |
| पूर्णमनोरथायै नमः । | प्रेतासनायै नमः |
| पतङ्गाभायै नमः५३० | प्रियालस्थायै नमः५५० |
| पतङ्गायै नमः | पाण्डुघ्न्यै नमः |
| पौनःपुन्यपिबापरायै नमः | पीनसापहायै नमः । |
| पङ्किलायै नमः | फलिन्यै नमः |
| पङ्कमग्नायै नमः | फलदात्र्यै नमः |
| पानीयायै नमः | फलश्रियै नमः |
| पञ्जरस्थितायै नमः । | फलभूषणायै नमः |
| पञ्चम्यै नमः | फूत्कारकारिण्यै नमः |
| पञ्चयज्ञायै नमः | स्फार्यै नमः |
| पञ्चतायै नमः | फुल्लायै नमः |
| पञ्चमप्रियायै नमः ५४० | फुल्लाम्बुजाननायै५६० |

| | |
|---|---|
| स्फुलिङ्गहायै नमः | वीणायै नमः |
| स्फीतमत्यै नमः | वीणावादनतत्परायै नमः |
| स्फीतकीर्तिकर्यै नमः | विनोदिन्यै नमः |
| बालमायायै नमः | विनोदस्थायै नमः |
| बलारात्यै नमः | वैष्णव्यै नमः |
| बलिन्यै नमः | विष्णुवल्लभायै नमः |
| बलवर्धिन्यै नमः। | वैद्यायै नमः |
| वेणुवाद्यायै नमः | वैद्यचिकित्सायै नमः |
| वनचर्यै नमः | विवशायै नमः |
| विरिञ्चिजनयित्र्यै ५७० | विश्वविश्रुतायै नमः:५९० |
| विद्याप्रदायै नमः | विद्यौघविह्वलायै नमः |
| महाविद्यायै नमः | वेलायै नमः |
| बोधिन्यै नमः | वित्तदायै नमः |
| बोधदायिन्यै नमः। | विगतज्वरायै नमः |
| बुद्धमात्रे नमः | विरावायै नमः |
| बुद्धायै नमः | विवरीकारायै नमः |
| वनमालावत्यै नमः | बिम्बोष्ठ्यै नमः |
| वरायै नमः | बिम्बवत्सलायै नमः । |
| वरदायै नमः | विन्ध्यस्थायै नमः |
| वारुण्यै नमः ५८० | वरवन्द्यायै नमः:६०० |





| | |
|---|---|
| वीरस्थानवरायै नमः | भीरवे नमः |
| विदे नमः | भेरुण्डायै नमः |
| वेदान्तवेद्यायै नमः | भियै नमः |
| विजयायै नमः | भयावहायै नमः |
| विजयाविजयप्रदायै नमः । | भगसर्पिण्यै नमः |
| विरोग्यै नमः | भगायै नमः |
| वन्दिन्यै नमः | भगरूपायै नमः |
| वन्ध्यायै नमः | भगालयायै नमः |
| वन्द्यायै नमः | भगासनायै नमः |
| बन्धनिवारिण्यै नमः ६१० | भवाभोगायै नमः ६३० |
| भगिन्यै नमः | भेरीझङ्काररञ्जितायै |
| भगमालायै नमः | भीषणायै नमः |
| भवान्यै नमः | भीषणारावायै नमः |
| भवनाशिन्यै नमः। | भगवत्यै नमः |
| भीमायै नमः | अहिभूषणायै नमः |
| भीमाननायै नमः | भारद्वाजायै नमः |
| भीमाभङ्गुरायै नमः | भोगदात्र्यै नमः |
| भीमदर्शनायै नमः | भूतिघ्न्यै नमः |
| भिल्ल्यै नमः | भूतिभूषणायै नमः |
| भिल्लधरायै नमः ६२० | भूमिदायै नमः ६४० |

| | |
|---|---|
| भूमिदात्र्यै नमः | मधुमर्दिन्यै नमः |
| भूपतये नमः | मोदायै नमः |
| भरदायिन्यै नमः | मोदकर्यै नमः |
| भ्रमर्यै नमः | मेधायै नमः |
| भ्रामर्यै नमः | मेध्यायै नमः |
| भालायै नमः | मध्याधिपस्थितायै नमः |
| भूपालकुलसंस्थितायै | मद्यपायै नमः |
| मात्रे नमः | मांसलोभस्थायै नमः |
| मनोहर्यै नमः | मोदिन्यै नमः |
| मायायै नमः६५० | मैथुनोद्यतायै ६७० |
| मानिन्यै नमः | मूर्धावत्यै नमः |
| मोहिन्यै नमः | महामायायै नमः |
| मह्यै नमः | मायायै नमः |
| महालक्ष्म्यै नमः | महिममन्दिरायै नमः । |
| मदक्षीबायै नमः | महामालायै नमः |
| मदिरायै नमः | महाविद्यायै नमः |
| मदिरालयायै नमः । | महामार्यै नमः |
| मदोद्धतायै नमः | महेश्वर्यै नमः |
| मतङ्गस्थायै नमः | महादेववध्वै नमः |
| माधव्यै नमः ६६० | मान्यायै नमः६८० |





| | |
|---|---|
| मथुरायै नमः | यावकरञ्जितायै नमः । |
| मेरुमण्डितायै नमः । | यवाङ्कुरप्रियायै नमः |
| मेदस्विन्यै नमः | यामायै नमः |
| मिलिन्दाक्ष्यै नमः | यवन्यै नमः |
| महिषासुरमर्दिन्यै नमः | यवनार्दिन्यै नमः |
| मण्डलस्थायै नमः | यमघ्न्यै नमः |
| भगस्थायै नमः | यमकल्पायै नमः |
| मदिरारागगर्वितायै नमः । | यजमानस्वरूपिण्यै नमः। |
| मोक्षदायै नमः | यज्ञायै नमः |
| मुण्डमालायै नमः६९० | यज्ञयजुषे नमः७१० |
| मालायै नमः | यक्ष्यै नमः |
| मालाविलासिन्यै नमः | यशोनिष्कम्पकारिण्यै |
| मातङ्गिन्यै नमः | यक्षिण्यै नमः |
| मातङ्ग्यै नमः | यक्षजनन्यै नमः |
| मातङ्गतनयायै | यशोदायै नमः |
| मधुस्रवायै नमः | यासधारिण्यै नमः। |
| मधुरसायै नमः | यशस्सूत्रप्रदायै नमः |
| बन्धूककुसुमप्रियायै नमः | यामायै नमः |
| यामिन्यै नमः | यज्ञकर्मकर्यै । |
| यामिनीनाथभूषायै ७०० | यशस्विन्यै नमः ७२० |

Mahaperiaval Trust, Gurukrupa, Bangalore-54.

| | |
|---|---|
| यकारस्थायै नमः | रमणीयायै नमः |
| यूपस्तम्भनिवासिन्यै नमः। | रामायै नमः |
| रञ्जितायै नमः | रामावत्यै रत्यै नमः |
| राजपत्न्यै नमः | रेतोरत्यै नमः |
| रमायै नमः | रतोत्साहायै नमः |
| रेखायै नमः | रोगघ्न्यै नमः |
| रवीरणायै नमः | रोगकारिण्यै नमः। |
| रजोवत्यै नमः | रङ्गायै नमः |
| रजश्चित्रायै नमः | रङ्गवत्यै नमः |
| रञ्जन्यै नमः ७३० | रागायै नमः ७५० |
| रजनीपत्यै नमः । | रागज्ञायै नमः |
| रोगिण्यै नमः | रागकृद्दयायै नमः |
| रजन्यै नमः | रामिकायै नमः |
| राज्ञ्यै नमः | रजक्यै नमः |
| राज्यदायै नमः | रेवायै नमः |
| राज्यवर्धिन्यै नमः | रजन्यै नमः |
| राजन्वत्यै नमः | रङ्गलोचनायै नमः । |
| राजनीत्यै नमः | रक्तचर्मधरायै नमः |
| रजतवासिन्यै नमः। | रङ्ग्यै नमः |
| रमण्यै नमः:७४० | रङ्गस्थायै नमः:७६० |





| | |
|---|---|
| रङ्गवाहिन्यै नमः | वेदविदे नमः |
| रमायै नमः | विधायै नमः । |
| रम्भाफलप्रीत्यै नमः | विकोपायै नमः |
| रम्भोरवे नमः | विकपालायै नमः |
| राघवप्रियायै नमः । | विङ्कस्थायै नमः |
| रङ्गायै नमः | विङ्कवत्सलायै नमः |
| रङ्गाङ्गमधुरायै नमः | वेद्यै नमः |
| रोदस्यै नमः | वलग्नलग्नायै नमः |
| महारवायै नमः | विधिविङ्ककरीविधायै नमः । |
| रोधकृते नमः ७७० | शङ्खिन्यै नमः:७९० |
| रोगहन्त्र्यै नमः | शङ्खवलयायै नमः |
| रूपभृते नमः | शङ्खमालावत्यै नमः |
| रोगस्राविण्यै नमः। | शम्यै नमः |
| बन्द्यै नमः | शङ्खपात्राशिन्यै नमः |
| वन्दिस्तुतायै नमः | शङ्खस्वनायै नमः |
| बन्धवे नमः | शङ्खगलायै नमः |
| बन्धूककुसुमाधरायै नमः | शश्यै नमः। |
| वन्दितायै नमः | शबर्यै नमः |
| वन्द्यमानायै नमः | शम्बर्यै नमः |
| वैद्राव्यै नमः ७८० | शम्भ्वै नमः:८०० |

| | |
|---|---|
| शम्भुकेशायै नमः | शेषायै नमः |
| शरासिन्यै नमः | शौर्यायै नमः |
| शवायै नमः | शौर्यशरायै नमः |
| श्येनवत्यै नमः | शर्यै नमः। |
| श्यामायै नमः | शापदायै नमः |
| श्यामाङ्ग्यै नमः | शापहायै नमः |
| श्यामलोचनायै नमः । | शापायै नमः |
| श्मशानस्थायै नमः | शापपथे नमः |
| श्मशानायै नमः | सदाशिवायै नमः |
| श्मशानस्थानभूषणायै८१० | शृङ्गिण्यै नमः८३० |
| शमदायै नमः | शृङ्गिपलभुजे नमः |
| शमहन्त्र्यै नमः | शङ्कर्यै नमः |
| शङ्खिन्यै नमः | शाङ्कर्यै नमः |
| शङ्खरोषणायै नमः । | शिवायै नमः । |
| शान्त्यै नमः | शवस्थायै नमः |
| शान्तिप्रदायै नमः | शवभुजे नमः |
| शेषाशेषाख्यायै नमः | शान्तायै नमः |
| शेषशायिन्यै नमः | शवकर्णायै नमः |
| शेमुष्यै नमः | शवोदर्यै नमः |
| शोषिण्यै नमः ८२० | शाविन्यै नमः८४० |





| | |
|---|---|
| शवशिंशायै नमः | सुन्दराननायै नमः |
| श्रियै नमः | साधवे नमः |
| शवायै नमः | सिद्धिप्रदात्र्यै नमः |
| शमशायिन्यै नमः। | सिद्धायै नमः |
| शवकुण्डलिन्यै नमः | सिद्धसरस्वत्यै नमः |
| शैवायै नमः | सन्तत्यै नमः |
| शीकरायै नमः | सम्पदायै नमः |
| शिशिराशिन्यै नमः | संविच्छङ्खिसम्पत्ति– |
| शवकाञ्च्यै नमः | –दायिन्यै नमः। |
| शवश्रीकायै नमः८५० | सपत्न्यै नमः |
| शवमालायै नमः | सरसायै नमः८७० |
| शवाकृत्यै नमः । | सारायै नमः |
| स्रवन्त्यै नमः | सारस्वतकर्यै नमः |
| सङ्कुचायै नमः | सुधायै नमः |
| शक्त्यै नमः | सुरासमांसाशनायै नमः |
| शन्तन्वै नमः | समाराध्यायै नमः |
| शवदायिन्यै नमः | समस्तदायै नमः । |
| सिन्धवे नमः | समधियै नमः |
| सरस्वत्यै नमः | सामदायै नमः |
| सिन्धुसुन्दर्यै नमः ८६० | सीमायै नमः |
| | सम्मोहायै नमः ८८० |

| | |
|---|---|
| समदर्शनायै नमः | हंसोज्ज्वलनिचोलयुजे |
| सामत्यै नमः | हलिन्यै नमः |
| सामधायै नमः | हालिन्यै नमः |
| सीमायै नमः | हालायै नमः |
| सावित्र्यै नमः | हलश्रियै नमः |
| सविधायै नमः | हरवल्लभायै नमः । |
| सत्यै नमः। | हलायै नमः |
| सवनायै नमः | हलवत्यै नमः |
| सवनासारायै नमः | ह्लेषायै नमः |
| सवरायै नमः ८९० | हेलायै नमः ९१० |
| सावरायै नमः | हर्षविवर्धिन्यै नमः |
| सम्यै नमः | हन्त्यै नमः |
| सिमरायै नमः | हन्तायै नमः |
| सततायै नमः | हयायै नमः |
| साध्व्यै नमः | हाहाहितायै नमः |
| सध्रीच्यै नमः | अहन्तातिकारिण्यै नमः। |
| ससहायिन्यै नमः | हङ्कार्यै नमः |
| हंस्यै नमः | हङ्कृत्यै नमः |
| हंसगत्यै नमः | हङ्कायै नमः |
| हंस्यै नमः९०० | हीहीहाहाहितायै ९२० |





| | |
|---|---|
| हितायै नमः | लोलायै नमः |
| हीत्यै नमः | ललनायै नमः |
| हेमप्रदायै नमः | ललितायै नमः |
| हाराराविण्यै नमः | लतायै नमः । |
| हरिसम्मतायै नमः । | ललामलोचनायै नमः |
| होरायै नमः | लोभ्यायै नमः |
| होत्र्यै नमः | लोलाक्ष्यै नमः |
| होलिकायै नमः | लकुलायै नमः |
| होमायै नमः | लयायै नमः |
| होमहविषे नमः ९३० | लपन्त्यै नमः ९५० |
| हव्यै नमः | लपत्यै नमः |
| हरिण्यै नमः | लम्पायै नमः |
| हरिणीनेत्रायै नमः | लोपामुद्रायै नमः |
| हिमाचलनिवासिन्यै नमः। | ललन्तिकायै नमः । |
| लम्बोदर्यै नमः | लतिकायै नमः |
| लम्बकर्णायै नमः | लङ्गिन्यै नमः |
| लम्बिकायै नमः | लङ्गायै नमः |
| लम्बविग्रहायै नमः | लालिमायै नमः |
| लीलायै नमः | लघुमध्यमायै नमः |
| लीलावत्यै नमः ९४० | लघीयस्यै नमः ९६० |

| | |
|---|---|
| लघूदर्यायै नमः | क्षमावत्यै नमः। |
| लूतायै नमः | क्षामायै नमः |
| लूताविनाशिन्यै नमः। | क्षामोदर्यै नमः |
| लोमशायै नमः | क्षेम्यायै नमः |
| लोमलम्ब्यै नमः | क्षौमभृते नमः |
| लुलन्त्यै नमः | क्षत्रियाङ्गनायै नमः |
| लुलुम्पन्यै नमः | क्षयायै नमः |
| लुलायस्थायै नमः | क्षयकर्यै नमः |
| लहर्यै नमः | क्षीरायै नमः |
| लङ्कापुरपुरन्दरायै ९७० | क्षीरदायै नमः९९० |
| लक्ष्म्यै नमः | क्षीरसागरायै नमः । |
| लक्ष्मीप्रदायै नमः | क्षेमङ्कर्यै नमः |
| लभ्यायै नमः | क्षयकर्यै नमः |
| लाक्षाक्ष्यै नमः | क्षयकृते नमः |
| लुलितप्रभायै नमः | क्षणदायै नमः |
| क्षणायै नमः | क्षत्यै नमः |
| क्षणक्षुते नमः | क्षुद्रिकायै नमः |
| क्षुत्क्षीणायै नमः | क्षुद्रिकाक्षुद्रायै नमः |
| क्षमायै नमः | क्षुत्क्षमायै नमः |
| क्षान्त्यै नमः९८० | क्षीणपातकायै १००० |
| | ********* |





## ॥ श्रीकमला–अष्टोत्तरशतनामस्तोत्रम् ॥

| | |
|---|---|
| महामायायै नमः | शक्रनुतायै नमः |
| महालक्ष्म्यै नमः | शङ्करप्रियवल्लभायै |
| महावाण्यै नमः | महावराहजनन्यै नमः |
| महेश्वर्यै नमः। | मदनायै नमः |
| महादेव्यै नमः | उन्मथिन्यै नमः |
| महारात्र्यै नमः | मह्यै नमः |
| महिषासुरमर्दिन्यै नमः | वैकुण्ठनाथरमण्यै नमः |
| कालरात्र्यै नमः | विष्णुवक्षःस्थलस्थितायै |
| कुह्वै नमः | विश्वेश्वर्यै नमः |
| पूर्णायै नमः१० | विश्वमात्रे नमः ३० |
| नन्दाद्यायै नमः | वरदायै नमः |
| भद्रिकायै नमः | अभयदायै नमः |
| निशायै नमः । | शिवायै नमः |
| जयायै नमः | शूलिन्यै नमः |
| रिक्तायै नमः | चक्रिण्यै नमः |
| महाशक्त्यै नमः | मायै नमः |
| देवमात्रे नमः | पाशिन्यै नमः |
| कृशोदर्यै नमः | शङ्खधारिण्यै नमः। |
| शच्यै नमः | गदिन्यै नमः |
| इन्द्राण्यै नमः २० | मुण्डमालायै नमः४० |

कमलायै नमः
करुणालयायै नमः
पद्माक्षधारिण्यै नमः
अम्बायै नमः
महाविष्णुप्रियङ्कर्यै नमः।
गोलोकनाथरमण्यै नमः
गोलोकेश्वरपूजितायै नमः
गयायै नमः
गङ्गायै नमः
यमुनायै नमः ५०
गोमत्यै नमः
गरुडासनायै नमः ।
गण्डक्यै नमः
सरस्वै नमः
ताप्यै नमः
रेवायै नमः
पयस्विन्यै नमः
नर्मदायै नमः
कावेर्यै नमः
केदारस्थलवासिन्यै ६०

किशोर्यै नमः
केशवनुतायै नमः
महेन्द्रपरिवन्दितायै नमः
ब्रह्मादिदेवनिर्माण–
–कारिण्यै नमः
वेदपूजितायै नमः ।
कोटिब्रह्माण्डमध्यस्थायै
कोटिब्रह्माण्डकारिण्यै
श्रुतिरूपायै नमः
श्रुतिकर्यै नमः
श्रुतिस्मृतिपरायणायै७०
इन्दिरायै नमः
सिन्धुतनयायै नमः
मातङ्ग्यै नमः
लोकमातृकायै नमः
त्रिलोकजनन्यै नमः
तन्त्रायै नमः
तन्त्रमन्त्रस्वरूपिण्यै
तरुण्यै नमः
तमोहन्त्र्यै नमः
मङ्गलायै नमः८०





मङ्गलायनायै नमः
मधुकैटभमथन्यै नमः
शुम्भासुरविनाशिन्यै नमः।
निशुम्भादिहरायै नमः
मात्रे नमः
हरिशङ्करपूजितायै नमः
सर्वदेवमय्यै नमः
सर्वायै नमः
शरणागतपालिन्यै नमः।
शरण्यायै नमः ९०
शम्भुवनितायै नमः
सिन्धुतीरनिवासिन्यै नमः
गन्धर्वगानरसिकायै नमः
गीतायै नमः
गोविन्दवल्लभायै नमः ।
त्रैलोक्यपालिन्यै नमः
तत्त्वरूपायै नमः
तारुण्यपूरितायै नमः
चन्द्रावल्यै नमः
चन्द्रमुख्यै नमः१००

चन्द्रिकायै नमः
चन्द्रपूजितायै नमः ।
चन्द्रायै नमः
शशाङ्कभगिन्यै नमः
गीतवाद्यपरायणायै नमः
सृष्टिरूपायै नमः
सृष्टिकर्यै नमः
सृष्टिसंहारकारिण्यै नमः१०८
********

Mahaperiaval Trust, Gurukrupa, Bangalore-54.

| ॥ श्रीकमलासहस्रनामस्तोत्रम् ॥_ | |
|---|---|
| ॐ श्रियै नमः | परमानन्दरूपिण्यै नमः। |
| पद्मायै नमः | नित्यशुद्धायै नमः |
| प्रकृत्यै नमः | नित्यतृप्तायै नमः |
| सत्त्वायै नमः | निर्विकारायै नमः |
| शान्तायै नमः | निरीक्षणायै नमः |
| चिच्छक्त्यै नमः | ज्ञानशक्त्यै नमः |
| अव्ययायै नमः । | कर्तृशक्त्यै नमः |
| केवलायै नमः | भोक्तृशक्त्यै नमः |
| निष्कलायै नमः | शिखावहायै नमः । |
| शुद्धायै नमः१० | स्नेहाभासायै नमः ३० |
| व्यापिन्यै नमः | निरानन्दायै नमः |
| व्योमविग्रहायै नमः | विभूत्यै नमः |
| व्योमपद्मकृताधारायै नमः | विमलायै नमः |
| परस्मै व्योम्ने नमः | चलायै नमः |
| मतोद्भवायै नमः । | अनन्तायै नमः |
| निर्व्योमायै नमः | वैष्णव्यै नमः |
| व्योममध्यस्थायै नमः | व्यक्तायै नमः |
| पञ्चव्योमपदाश्रितायै नमः | विश्वानन्दायै नमः |
| अच्युतायै नमः | विकाशिन्यै नमः। |
| व्योमनिलयायै नमः२० | शक्त्यै नमः४० |





| | |
|---|---|
| विभिन्नसर्वार्त्यै नमः | निराधारायै नमः |
| समुद्रपरितोषिण्यै नमः | निस्सङ्कल्पायै नमः |
| मूर्त्यै नमः | निराश्रयायै नमः । |
| सनातन्यै नमः | असङ्कीर्णायै नमः |
| हार्द्यै नमः | सुशान्तायै नमः |
| निस्तरङ्गायै नमः | शाश्वत्यै नमः |
| निरामयायै नमः । | भासुर्यै नमः |
| ज्ञानज्ञेयायै नमः | स्थिरायै नमः |
| ज्ञानगम्यायै नमः | अनौपम्यायै नमः |
| ज्ञानज्ञेयविकासिन्यै ५० | निर्विकल्पायै नमः७० |
| स्वच्छन्दशक्त्यै नमः | निर्यन्त्रायै नमः |
| गहनायै नमः | यन्त्रवाहिन्यै नमः। |
| निष्कम्पार्च्यै नमः | अभेद्यायै नमः |
| सुनिर्मलायै नमः । | भेदिन्यै नमः |
| स्वरूपायै नमः | भिन्नायै नमः |
| सर्वगायै नमः | भारत्यै नमः |
| अपारायै नमः | वैखर्यै नमः |
| बृंहिण्यै नमः | खगायै नमः |
| सुगुणोर्जितायै नमः | अग्राह्यायै नमः |
| अकलङ्कायै नमः६० | ग्राहिकायै नमः८० |

गूढायै नमः
गम्भीरायै नमः
विश्वगोपिन्यै नमः।
अनिर्देश्यायै नमः
अप्रतिहतायै नमः
निर्बीजायै नमः
पावन्यै नमः
परायै नमः
अप्रतर्क्यायै नमः
अपरिमितायै नमः९०
भवभ्रान्तिविनाशिन्यै नमः।
एकायै नमः
द्विरूपायै नमः
त्रिविधायै नमः
असङ्ख्यातायै नमः
सुरेश्वर्यै नमः
सुप्रतिष्ठायै नमः
महाधात्र्यै नमः
स्थित्यै नमः
वृद्ध्यै नमः १००

ध्रुवायै गत्यै नमः ।
ईश्वर्यै नमः
महिमायै नमः
ऋद्ध्यै नमः
प्रमोदायै नमः
उज्ज्वलोद्यमायै नमः
अक्षयायै नमः
वर्धमानायै नमः
सुप्रकाशायै नमः
विहङ्गमायै नमः ११०
नीरजायै नमः
जनन्यै नमः
नित्यायै नमः
जयायै नमः
रोचिष्मत्यै नमः
शुभायै नमः
तमोनुदायै नमः
ज्वालायै नमः
सुदीप्त्यै नमः
अंशुमालिन्यै नमः१२०





अप्रमेयायै नमः
त्रिधा सूक्ष्मायै नमः
परायै नमः
निर्वाणदायिन्यै नमः
अवदातायै नमः
सुशुद्धायै नमः
अमोघाख्यायै नमः
परम्परायै नमः ।
सन्धानक्यै नमः
शुद्धविद्यायै नमः१३०
सर्वभूतमहेश्वर्यै नमः
लक्ष्म्यै नमः
तुष्ट्यै नमः
महाधीरायै नमः
शान्त्यै नमः
आपूरणे नवायै नमः ।
अनुग्रहाशक्त्यै नमः
आद्यायै नमः
जगज्ज्येष्ठायै नमः
जगद्विध्यै नमः१४०

सत्यायै नमः
प्रह्वायै नमः
क्रियायोग्यायै नमः
अपर्णायै नमः
ह्लादिन्यै नमः
शिवायै नमः ।
सम्पूर्णाह्लादिन्यै नमः
शुद्धायै नमः
ज्योतिष्मत्यै नमः
अमतावहायै नमः१५०
रजोवत्यर्कप्रतिभायै
आकर्षिण्यै नमः
कर्षिण्यै नमः
रसायै नमः ।
परायै नमः
वसुमत्यै नमः
देव्यै नमः
कान्त्यै नमः
शान्त्यै नमः
मत्यै नमः १६०

| | |
|---|---|
| कलायै नमः | शुद्धायै नमः |
| कलायै नमः | ध्वन्यै नमः |
| कलङ्करहितायै नमः | सृत्यै नमः |
| विशालोद्दीपन्यै नमः | सृष्ट्यै नमः |
| रत्यै नमः । | विकृत्यै नमः |
| सम्बोधिन्यै नमः | कृष्ट्यै नमः |
| हारिण्यै नमः | प्रापण्यै नमः |
| प्रभावायै नमः | प्राणदायै नमः |
| भवभूतिदायै नमः | प्रह्वायै नमः |
| अमृतस्यन्दिन्यै नमः१७० | विश्वायै नमः१९० |
| जीवायै नमः | पाण्डुरवासिन्यै नमः |
| जनन्यै नमः | अवन्यै नमः |
| खण्डिकायै नमः | वज्रनलिकायै नमः |
| स्थिरायै नमः । | चित्रायै नमः |
| धूमायै नमः | ब्रह्माण्डवासिन्यै नमः। |
| कलावत्यै नमः | अनन्तरूपायै नमः |
| पूर्णायै नमः | अनन्तात्मने नमः |
| भासुरायै नमः | अनन्तस्थायै नमः |
| सुमत्यै नमः | अनन्तसम्भवायै नमः |
| रसायै नमः१८० | महाशक्त्यै नमः २०० |





| | |
|---|---|
| प्राणशक्त्यै नमः | सर्वार्थभाषिण्यै नमः |
| प्राणदात्र्यै नमः | नानास्वरूपचिद्धात्र्यै |
| रतिम्भरायै नमः । | शब्दपूर्वायै नमः |
| महासमूहायै नमः | पुरातनायै नमः । |
| निखिलायै नमः | व्यक्तायै नमः |
| इच्छाधारायै नमः | अव्यक्तायै नमः |
| सुखावहायै नमः | जीवकेशायै नमः |
| प्रत्यक्षलक्ष्म्यै नमः | सर्वेच्छापरिपूरितायै |
| निष्कम्पायै नमः | सङ्कल्पसिद्धायै नमः |
| प्ररोहायै नमः२१० | साङ्ख्येयायै २३० |
